# Shri Yoni Stavarajah

# શ્રીયોનિસ્તવરાજઃ

## Document Information

Text title : Yoni StavarAjah

File name : yonistavarAjaH.itx

Category : devii, devI, stavarAja

Location : doc_devii

Transliterated by : Durga Sharma

Proofread by : Durga Sharma, NA

Latest update : June 28, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 28, 2026

*sanskritdocuments.org*

# શ્રીયોનિસ્તવરાજઃ

અથ યોનિ-ધ્યાનમ્ ।
અતિસુલલિતગાત્રાં હાસ્યવક્ત્રાં ત્રિનેત્રાં
જિતજલદસુકાન્તિં પટ્ટવસ્ત્રપ્રકાશામ્ ।
અભયવરકરાઢ્યાં રત્નભૂષાતિભવ્યાં
સુરતરુતલપીઠ રત્નસિંહાસનસ્થામ્ ॥ ૧॥

હરિહરવિધિવન્દ્યાં બુદ્ધિશુદ્ધિસ્વરૂપાં
મદનરસસમાક્તાં કામિનીં કામદાત્રીમ્ ।
નિખિલજનવિલાસોદ્દામરૂપાં ભવાનીં
કલિકલુષનિહન્ત્રીં યોનિરૂપાં ભજામિ ॥ ૨॥

શ્રીદેવ્યુવાચ -
ભગવાન્ સર્વધર્મજ્ઞ કુલશાસ્ત્રાર્થપારગ ।
સર્વં મે કથિતં નાથ ન ત્વેકં પરમેશ્વર ॥ ૧॥

શ્રીયોનેઃ સ્તવરાજં હિ તથા કવચમુત્તમમ્ ।
શ્રોતુમિચ્છામિ સર્વજ્ઞ યદિ તેઽસ્તિ કૃપા મયિ ॥ ૨॥

સારભૂતં મહાદેવ નિગમાન્તર્ગતં હર ।
યદિ ન કથ્યતે દેવ પ્રાણત્યાગં કરોમ્યહમ્ ॥ ૩॥

દિવાનિશિ મહાભાગ મમાશ્રુઃ પતિતં ભવેત્ ।
અતસ્તદ્ દેવદેવેશ કથ્યતાં મે દયાનિધે ॥ ૪॥

શ્રીમહાદેવ ઉવાચ ।
શ ૃણુ પાર્વતિ વક્ષ્યામિ દેહત્યાગં કથં કુરુ ।
અત્યન્તગોપનીયં હિ નિગમે કથિતં પુરા ॥ ૫॥

બ્રહ્માવિષ્ણુગ્રહાદીનાં ન મયા કથિતં પુરા ।
અકથ્યં પરમેશાનિ ઇદાનીં કિ કરોમિ તે ॥ ૬॥

તવ સ્નેહેન બદ્ધોઽહં કથયામિ તવ પ્રિયે ।
માતર્દેવિ મહાભાગે યદિ કસ્મૈ પ્રકાશ્યતે ।
શપથં કુરુ મે દુર્ગે યદિ ત્વં મત્પ્રિયા સ્મૃતા ॥ ૭॥

બ્રહ્મા યદિ ચતુર્વક્ત્રૈઃ પઞ્ચવક્ત્રૈઃ સદાશિવઃ ।
વર્ણિતું સ્તવરાજઞ્ચ ન શક્નોતિ કદાચન ।
સમ્યગ્ વક્તું ન શક્નોમિ સંક્ષેપાત્ કથયામિ તે ॥ ૮॥

શ્રી મહાદેવ ઉવાચ ।
અસ્ય શ્રી યોનિસ્તવરાજસ્ય કુલાચાર્ય-ઋષિઃ કૌલિકછન્દઃ ।
શ્રીયોનિરૂપા દશવિદ્યાત્મિકા દેવતા સર્વસાધને વિનિયોગઃ ॥

ૐ યોનિરૂપે મહામાયે સર્વસમ્પત્પ્રદે શુભે ।
કૃપયા સર્વસિદ્ધિં મે દેહિ દેવિ જગન્મયિ ॥ ૧॥

સર્વસ્વરૂપે સર્વેશે સર્વશક્તિ સમન્વિતે ।
કૃપયા સર્વસિદ્ધિં મે દેહિ દેવિ જગન્મયિ ॥ ૨॥

મહાઘોરે મહાકાલિ કુલાચારપ્રિયે સદા ।
કૃપયા સર્વસિદ્ધિં મે દેહિ દેવિ જગન્મયિ ॥ ૩॥

ઘોરદંષ્ટ્રે ચોગ્રતારે સર્વશત્રુવિનાશિનિ ॥
કૃપયા સર્વસિદ્ધિં મે દેહિ દેવિ જગન્મયિ ॥ ૪॥

યોનિરૂપા મહાવિદ્યે સર્વદા મોક્ષદાયિની ।
કૃપયા સર્વસિદ્ધિં મે દેહિ દેવિ જગન્મયિ ॥ ૫॥

જગદ્ધાત્રિ મહાવિદ્યે જગદુદ્ધારકારિણિ ।
કૃપયા સર્વસિદ્ધિં મે દેહિ દેવિ જગન્મયિ ॥ ૬॥

જગદ્ધાત્રિ મહામાયે યોનિરૂપે સનાતનિ ।
કૃપયા સર્વસિદ્ધિં મે દેહિ દેવિ જગન્મયિ ॥ ૭॥

જય દેવિ જગન્માતઃ સૃષ્ટિસ્થિત્યન્તકારિણી ।
કૃપયા સર્વસિદ્ધિં મે દેહિ દેવિ જગન્મયિ ॥ ૮॥

સિદ્ધિદાત્રિ મહામાયે સર્વસિદ્ધિ-પ્રદાયિનિ ।
કૃપયા સર્વસિદ્ધિં મેં દેહિ દેવિ જગન્મયિ ॥ ૯॥

મહાલક્ષ્મિ મહાદેવિ મહા-મોક્ષ-પ્રદાયિનિ ।

કૃપયા સર્વસિદ્ધિં મે દેહિ દેવિ જગન્મયિ ॥ ૧૦॥

ગૌરી લક્ષ્મીશ્ચ માતઙ્ગી દુર્ગા ચ નવ-ચણ્ડિકા ।
બગલામુખી ભુવનેશી ભૈરવી ચ તથા પ્રિયે ।
છિન્નમસ્તા ચ કાલી ચ યોનિ-રુપા સનાતની ।
કૃપયા સર્વસિદ્ધિં મે દેહિ દેવિ જગન્મયિ ॥ ૧૧॥

કાલી કપાલિની કુલ્લા કુરુ-કુલ્લા વિરોધિની ।
નાયિકા વિપ્રચિત્તાદ્યા અન્યા યા નાયિકા સ્મૃતાઃ ।
વસન્તિ યોનિમાશ્રિત્ય તાભ્યોઽપીહ નમો નમઃ ॥ ૧૨॥

અણિમાદ્યષ્ટસિદ્ધિશ્ચ વસત્યસ્યાઃ સમીપતઃ ।
નમસ્તેઽસ્તુ નમસ્તેઽસ્તુ યોગ-મોક્ષ-પ્રદાયિનિ ॥ ૧૩॥

સર્વશક્તિમયે દેવિ સર્વકલ્મષનાશિનિ ।
હે યોને! હર વિઘ્નં મે સર્વસિદ્ધિં પ્રયચ્છ મે ॥ ૧૪॥

આધારભૂતે સર્વેષા પૂજકાનાં પ્રિયંવદે ।
સ્વર્ગપાતાલ વાસિન્યે યોનયે ચ નમો નમઃ ॥ ૧૫॥

વિષ્ણુસિદ્ધિપ્રદે દેવિ શિવસિદ્ધિપ્રદાયિની ।
બ્રહ્મસિદ્ધિપ્રદે દેવિ રામચન્દ્રસ્ય સિદ્ધિયે ।
શક્રાદીનાઞ્ચ સર્વેષાં સિદ્ધિદાયૈ નમો નમઃ ॥ ૧૬॥

ફલશ્રુતિઃ ।
ઇતિ તે કથિતં દેવિ સર્વસિદ્ધિપ્રદાયકમ્ ।
સ્તોત્ર યોનેર્મહેશાનિ પ્રકાશયામિ તે પ્રિયે ॥ ૧॥

સર્વસિદ્ધિપ્રદં સ્તોત્રં યઃ પઠેત્ કૌલિકઃ પ્રિયે ।
લિખિત્વા પુસ્તકે દેવિ રક્તદ્રવ્યૈશ્ચ સુન્દરિ ॥ ૨॥

તસ્યા-સાધ્યાનિ કર્માણિ વશ્યાદીનિ કુલેશ્વરિ ।
નાસ્તિ નાસ્તિ પુનર્નાસ્તિ નાસ્ત્યેવ ભુવનત્રયે ।
યઃ પઠેત્ પ્રાતરુત્થાય ગાણપત્યં લભેન્નરઃ ॥ ૩॥

રાત્રૌ કાન્તાસમાયોગે યઃ પઠેત્ સાધકોત્તમઃ ।
સ્તવેનાનેન સંસ્તુત્ય સાધકઃ કિં ન સાધયેત્ ॥ ૪॥

સાલઙ્કૃતાં સ્વકાન્તાઞ્ચ લીલાહાવવિભૂષિતામ્ ।

રક્તવસ્ત્રપરીધાનાં કૃત્વા સમ્પૂજ્ય સાધકઃ ।
ભોજયિત્વા તતો દેવિ સ્વયં ભુઞ્જીત તત્પરઃ ॥ ૫॥

મત્સ્યમાંસાદિકાન્ ભુક્ત્વા ક્રોડે કૃત્વા સ્વયોષિતમ્ ।
રાત્રૌ યદિ જપેન્મન્ત્રં સા દુર્ગા સ સદાશિવઃ ।
ભવત્યેવ ન સન્દેહો મમ વક્ત્રાદ્વિનિર્ગતમ્ ॥ ૬॥

યેન દત્તં મયિ સ્તોત્રં સ એવ મદ્ગુરુઃ સ્મૃતઃ ।
તસ્યૈવ યદિ ભક્તિઃ સ્યાત્ સ ભવેજ્જગદીશ્વરઃ ॥ ૭॥

નમોસ્તુ સ્તવરાજાય નમઃ સ્તવપ્રકાશિને ।
યત્રાસ્તે સ્તવરાજોઽયં તત્રાસ્તે શ્રીસદાશિવઃ ॥ ૮॥

ઇતિ શક્તિકાગમસર્વસ્વે હરપાર્વતીસંવાદે શ્રીયોનિસ્તવરાજઃ સમાપ્તઃ ।

Source- Shakti Agama

Encoded and proofread by Durga Sharma

---

*Shri Yoni Stavarajah*

pdf was typeset on June 28, 2026

Please send corrections to *sanskrit@cheerful.com*